VOL. XVII(II)
July - December 2024

ISSN : 2454-5430

# ANVESHA
## THE HORIZON

Half Yearly Peer-Reviewed Journal

Patron
**Major (Dr.) S.P. Singh**
Secretary, Management Committee
Kisan P.G. College, Bahraich

Chief Editor
**Prof.(Dr.) Vinay Saxena**
Principal

Editor
**Dr. Sandeep Kumar Mishra**
Asst. Professor - Deptt. of Sanskrit

**KISAN P. G. COLLEGE, BAHRAICH**
(AUTONOMOUS)
Affiliated to Dr. R.M.L. Avadh University, Ayodhya (U.P.)

15. रश्मिरथी पर संस्कृत साहित्य का प्रभाव
*डॉ.अरुण कुमार निषाद* 81-84

16. आधुनिक संस्कृत साहित्य में रक्षतगंगाम् महाकाव्य का स्थान एवं महत्त्व
*हेमलता त्रिवेदी* 85-90

17. स्फोटतत्त्वनिरूपणं
*डॉ. आभा द्विवेदी* 91-94

18. श्रीभक्तिरसामृतसिन्धुः दृष्ट्या भक्तिरसे स्थायिभावसमीक्षणम् 95-103
*श्रीनिखिलवर्मणः, डॉ. कमललोचन आत्रेयः*

19. आधुनिकयुगे पुष्पादीक्षितमहोदयाया अवदानम् 104-107
*निशिकान्तपाण्डेयः*

20. अथर्ववेदसंहितायां कृषिविज्ञानम् 108-111
*कृशाङ्गीभट्टाचार्यः*

21. असमप्रदेशे भक्त्यान्दोलने श्रीमद्भागवद्महापुराणस्य प्रभावः 112-119
*पङ्कजकुमारमिश्रः*

22. वेदान्तदर्शनस्य अचिन्त्यभेदाभेदवादे भक्तिस्वरूपम् – एकमध्ययनम् 120-126
*डा. रणजीतकुमारतिवारी, बुद्धदेव पुरकायस्थः*

ANVESHA THE HORIZON
Vol. XVII(II), Jul-Dec 2024, Page No. 120-126

# वेदान्तदर्शनस्य अचिन्त्यभेदाभेदवादे भक्तिस्वरूपम् – एकमध्ययनम्

**बुद्धदेव पुरकायस्थः**[1] **, डा. रणजीतकुमारतिवारी**[2]

[1]शोधच्छात्रः, कु.भा.व.सं.पु.अ.विश्वविद्यालयः

[2] सहाचार्यः, सर्वदर्शनविभागः, कु.भा.व.सं.पु.अ. विश्वविद्यालयः, नलबारी

**कुंजी शब्द–**
भक्तिपरिचयः
भक्तिस्वरूपम्
नवधाभक्तिः

**सारांश**

वेदान्तदर्शनं यस्मिन् शास्त्रे वैदिकचिन्तनस्य पराकाष्ठा भवति, तस्मिन् बन्धः शरीरेण सह आत्मनः सङ्गतिरस्ति तथा च यदा अज्ञानद्वारा ते आत्मनः स्वस्वभावं विस्मृत्य शरीरेण, मनसा, अन्ते च 'अहङ्कारेण' सह स्वस्य परिचयं करोति । आत्मनः यथार्थस्वभावस्य साक्षात्कारेण मुक्तिं प्राप्तुं शक्यते – मूलाज्ञाननिर्वृत्तौ स्वस्वरूपाधिगमो मोक्षः इति अद्वैतवेदान्तिनः। 'यो हि लोके निरतिशयप्रियः सः सर्वप्रयत्नेन लब्धव्यो भवति । तथायमात्मा सार्वलौकिकप्रियेभ्यः प्रियतमः । तस्मात्तल्लाभे महान्यत्न आस्थेय इत्यर्थः'[1] । आत्मस्वरूपावस्थानमेव परं निरूश्रेयससाधनं नान्यत्किञ्चित्'[2] । वेदान्तमते अस्मिन् जीवने आत्मनः शरीरेण सह सम्बद्धसत्वेऽपि मुक्तिर्सम्भवति ।आचार्यशङ्करस्य मुक्तिसंकल्पना एषा जीवन्मुक्तिः इति नाम्ना प्रसिद्धा अस्ति । यथोक्तं वेदान्तसारे, 'जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृतेऽज्ञान–तत्तत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्त्वादखिल–बाधारहितो ब्रह्मनिष्ठः।'[3]

धर्मार्थकाममोक्षाख्येषुचतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः। मोक्षप्राप्तौ कर्म–भक्ति–ज्ञानमितित्रयः मार्गाः दार्शनिकैः महर्षिभिः प्रदर्शिताः ।तेषु पुरुषार्थप्राप्तौ सुलभोपायत्वेन भक्तिमार्गः विशिष्यते। भक्तिः अनुभवजन्यस्य अनुभवस्य विषयः अस्ति, यः मानवस्य अन्तःकरणेन अनुभूयते। मानवहृदये सहजप्रेमभावोभवति,यः मानवस्य चैतन्यं निरन्तरं प्रभावितं करोति, उत्तेजयति च। भक्तिः केवलं साधारणं प्रेमभावः न, अपितु ईश्वरं प्रति अनन्य–समर्पणभावः, साक्षात्कार–लक्षण–रूपेण सत्त्वे प्रतिष्ठितः भवति । भक्ति ईश्वरस्य परमं प्रेम, यत् वक्तुम् अभिप्रेतं तत् अस्ति यत् ईश्वरे अखण्डविश्वासः, निःस्वार्थप्रेम, निःस्वार्थभावः, निःश्चलप्रेम, निष्कामभावः च भक्तिः एव।

भक्तेः त्रीणिमुख्यलक्षणानि प्रसिद्धानि सन्ति – प्रेम–पूर्णसमर्पण–अनन्यता च। भक्तिः तु प्रेमस्वरूपा, यत्र भक्तः अनन्यभावेन भगवति स्वस्य प्रेम प्रकाशयति। उदाहरणतया श्रीमद्भगवद्गीतायाम् श्रीकृष्णः अर्जुनाय उद्घोषयति, 'भक्त्या मामभिजानाति'[4] , अत्र प्रेमरूपभक्त्या तत्त्वज्ञानं संभवति इति प्रतिपाद्यते ।भक्तिः आत्मनः सर्वस्वं भगवत्यर्पयति। यथा नारदभक्तिसूत्रेषु निर्दिष्टं यत् सर्वथा आत्मनः समर्पणं भक्तिः इति। यत्र भक्तः स्व–समस्तविषयार्थान् परित्यज्य भगवति आत्यन्तिकीं श्रद्धां स्थापयति ।भक्तिः अनन्यभावेन केवलं भगवति केन्द्रितः अस्ति, अन्यासक्तिहीनास्ति। यथा भगवता श्रीकृष्णेनोक्तं वर्तते – 'सर्वधर्मान् परित्यज्य मामेकं शरणं